Shri Raghunath Temple MSS. Library,
JAMMU

No. १०८१-घ

Title परमहंस कवचम्

Author

Extent २ (3) Age

Subject तन्त्रम्

परमहंसकवचम्

१०८१

२५२

श्रीगणेशायनमः ॐपरमहंसायनमः श्रीदेव्युवाच भगवन्सर्वधर्म
मेश सर्वतंत्रविशारदः कथयंश्रोतुमिच्छामिहंसस्यपरमस्य च त्वत्प्र।
सादान्महादेवमुखानिविविधानि च तन्मेकथयदेवेश यदिस्नेहोस्तिमां
प्रति २ श्रीभैरवोवाच प्रागतवारसहस्राणिवारितासिपुनः पुनः [illegible] स्त्री
स्वभावान्महादेवीपुनस्त्वंपरिपृच्छसि ३ तथापिकथयेदिव्यं कथयामिशृ
णुप्रिये अप्रकाश्यमिमंभद्रे गोपनीयंप्रयत्नतः नदेयंपरशिष्याय चाज्ञाय
स्वल्पबुद्धये सर्वायज्ञानहीनायनिंदकायदुरात्मने गुरुभक्तिविहीनायनदे
यंपरमेश्वरी ५ देयंशिष्यायभक्तायसाधकायनप्रकाशयेत् ॐ अस्यश्रीपर
महंसकवचस्य श्रीमहादेवऋषिः विराट्छंदः श्रीपरमहंसपरमात्मादेवता
हक्रौंरीतिबीजं सकारेतिशक्तिः ॐकारेतिकीलकं ममचतुर्वर्गसाधनेजपेवि
नियोगः इतिसंकल्पः अंगन्यासः महादेवऋषयेनमः शिरसि विराटछंदसे १

न्नमः मुखे परमहंसदेवतायै न्नमः हृदये हकारशक्तये न्नमः पादयोः ॐकारकी
लकायन्नमः नाभौ ममचतुर्वर्गसाधने पाठे विनियोगः सर्वांगेषु अथ करन्यासः १
ॐ हंसां अंगु० ॐ हंसीं तर्ज० ॐ हंसूं मध्य० ॐ हंसैं अना० ॐ हंसौं कनि० ॐ हंसः करत०
एवं हृदयादि अथ ध्यानं ॐ हृदयकमलमध्ये दीपवत्० इति ध्यानं शिरो मे सच्चि
दानंदः पातु मामलसज्ञकः नेत्रं दक्षिणमंगं च स्वरूपा पातु सर्वदा वामनेत्रं
सदा पाया ज्योतिरूपः सदावतु नासिका पातु भुवात्मा मुखं ब्रह्मस्वरूपकः चि
बुकं पातु देवेशस्तुरीयः परमेश्वर कंठं पातु महायोगी हृदयं तु शिवात्मकः दक्षि
णभोत्रं भगवान्वामं च योगिसत्तमः हृदयं हंसरूपी च पापादोस्तनयुग्मके सच्चिदा
नंदरूपी च पृष्ठं पातु परात्मकः पातु युग्मं वियद्व्यापी चोदरे पवनात्मकः बाहुमूले
च हंसो वै रूपे रेमधुसूदन मणिबंधे सदा पातु हीश्वरो वै सदाशिवः लिंगमूलं वि
धिः पातु लक्ष्मद्रो चासिद्धकः गुह्यं पातु शक्तिरूपे पादमूले त्रिविक्रमः जानुनी पातु
गौरी सर्वरूपी स्वाधिष्ठाने उरूथवशक न मणिपूरे नाभिदेशे पापाजे जः स्वरूपवान् अनाहते

वायुर्वृद्धिकरश्चैव देवो विरूपकः आज्ञाचक्रे तु ज्योतिस्तु राहस्थो रेचितात्मकः इडायां श
क्तिरूपी च पिंगलायां गभस्तिकः सुषुम्णायां स्वरूपी च चित्रायां सूक्ष्मरूपकः पूर्वे पा
तु महेंद्रश्च नैरृत्यां गरुडध्वजः पश्चिमे च व्योमभूतः पातु वायव्ये गरुडेश्वरः उ
दीच्यां पातु कौबेर्ये शान्त्यां भूरधारकः ऊर्ध्वं पातु जगत्कर्ता चाधोभागे त्वनंतकः
यन्नकस्य चिरस्थाने तं तं देगे पातु माधवः इति ते कथितं सर्वं सारात्सारतरं शुभं
पठनाद्धारणाद्योगी दिव्यं विज्ञानमाप्नुयात् ब्रह्मास्त्रादीनि चास्त्राणि निवारयति
निश्चितं अग्निस्तंभं जलस्तंभं गतिस्तंभं चिवस्वतः वायुतुल्यबलो लोके दुर्जे
यः शत्रुमर्दनः शापानुग्रहकारी च तेजस्वी कामरूपधृक् भूर्जे विलिख्य कवचं
स्वर्णस्थं धारयेद्भुजे हस्तिनं साधकं दृष्ट्वा पलायंति दिशो दिशः गुरुं संपूज्य वि
धिवत् कवचं प्रपठेद्यदि धर्मार्थकाममोक्षांश्च प्राप्नुयात् परमं पदं त्रिकालं तो
भवेद्देवि त्वलिमाधवसिद्धयः करे तस्य महेशानि नात्र कार्या विचारणात् तस्मा
दुर्लभ्यमसेयोगी योगसिद्धिमवाप्नुयात् मंत्रस्य स्मरणाद्देवीपुराभिष्टफलप्रदा किं

परमहंसकवचं संपूर्णं शुभं भवतु ॥

3

